नेयम्- [1]विनीयः-[कल्कः] विनेयः, [2]आनाय्यः [दक्षिणाग्निः] आनेयः[घटः], [3]प्रणाय्यः[A] [चोरः, विरक्तश्च], प्रणेयः, [4]सान्नाय्यम् [हविः], नाय्यम्, निनीष्यम्, नेनीय्यम्; — —

ईषन्नयः-[5]दुर्नयः-सुनयः; — — —

नीयमानः, नाय्यमानः, निनीष्यमाणः, नेनीय्यमानः;

[6]नायः, निर्णयः-दुर्नयः-प्रणयः-सुनयः-अनुनयः-विनयः-उपनयः, [7]नयः, उन्नयः, [8]अवनायः-उन्नायः, [9]परिणायः-परिणयः, [10]आनायः [जालम्], नायः, निनीषः, नेनीयः;

नेतुम्, नाययितुम्, निनीषितुम्, नेनीयितुम्;

नीतिः, नायना, निनीषा, नेनीया;

---

1. 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' (3-1-117) इति सूत्रेण विपूर्वकादस्मात् क्यपि रूपं निपातितम्। **विनीयः**=कल्कः। 'पिष्टौषधे पक्वान्नतैलादीना-मृजीषे, पाके च वर्तते।' इति **माधवधातुवृत्तिः**।

2. **'आनाय्योऽनित्ये'** (3-1-127) इत्यनेन आङ्पूर्वादस्माण्ण्यति, आयादेशो निपात्यते। आनीयते **इत्यानाय्यः**=दक्षिणाग्निविशेषः। 'स हि गार्हपत्यादा-नीयते, अनित्यश्च सततमप्रज्वलनात्। **'आनाय्यः** = गोधुक्।' इति **क्षीरस्वामी**। **आनेयो**ऽन्यः घटादिः।' इति **सिद्धान्तकौमुदी**।

3. **'प्रणाय्योऽसम्मतौ'** (3-1-128) इति प्रपूर्वकादस्मात् ण्यदायादेशौ निपात्येते असम्मतावर्थे। **सम्मतिः**=प्रीतिविषयीभवनम्, भोगेष्वादरश्च। तद्भिन्नोऽर्थो-ऽसम्मतिः। चोरः **प्रणाय्यः**=प्रीत्यनर्हः। शिष्यः **प्रणाय्यः**=विरक्तः।

4. 'पाय्यसान्नाय्य—' (3-1-129) इत्यादिना ण्यदायादेशयो रूपमेवम्। **सान्ना-य्यम्** = दधिपयसी।

5. **माधवधातुवृत्तौ** तु **'दुर्णयः'** इति णत्वविशिष्टतया रूपमुपलभ्यते। 'दुरः षत्वणत्वयोः—' (वा. 1-4-60) इति वचनात् णत्वाभावविशिष्ट एव शब्दः साधुरिति प्रतिभाति।

6. 'श्रिणीभुवोऽनुपसर्गे' (3-3-24) इति भावेऽजपवादो घञ्। उपसृष्टात्तु **'एरच्'** (3-3-56) इत्यजेव—**निर्णयः** इत्यादि।

7. भावे **नय** इति तु बाहुलकात् ज्ञेयः। एवम् **उन्नय** इत्यपि।

8. **'अवोदोर्नियः'** (3-3-26) इति अव-उत्पूर्वकादस्मात् घञि साधुः।

9. 'परिन्योर्नीणोर्द्यूताभ्रेषयोः' (3-3-37) इति परौ उपसर्गे घञ् द्यूतेऽभिधेये। **परिणा-येन** शारान् हन्ति। **परिणायः**=समन्तात् द्यूतसाधनानाम् अक्षाणां नयनम्।

10. **'जालमानायः'** (3-3-124) इति जालेऽभिधेये आङ्पूर्वकादस्माद् घञ् संज्ञायाम्। 'पुंसि संज्ञायां घः—' (3-3-118) इत्यस्यापवादः।

A. 'न **प्रणाय्यो** जनः कश्चिन्निकाय्यं तेऽधितिष्ठति।' भ. का. 6.67.